M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 806

Title: Shdūtapa Smriti

806

806

शातातपस्मृतिः (कर्मविपाकः)

Shatatapa Smriti : **Title**

(Karma-Vipāka) : **Author**

: **Editor**

Saka 1725 : **Year, Vols.**

: **Publisher**

806 : **Remarks**

806

श्रीगणेशायनमः॥ प्रणम्यगिरिजापुत्रंपितरावग्रजंतथा।लिख्यतेरघुनाथेनशातातपमुनेःस्मृतिः।१ प्रायश्चित्तविहीनानांमहापातकिनांनृणां।नरकांतेभवेज्जन्मचिह्नांकितशरीरिणां।२ प्रतिजन्मभवेत्तेषांचिह्नंतत्पापसूचकं।प्रायश्चित्तेकृतेपश्चात्पश्चात्तापवतांपुनः।३ महापातकजंचिह्नंसप्तजन्मनिजायते।उपपापोद्भवंपंचत्रीणिपातकसंभवं।४ दुःकर्मजान्नृणांरोगायांतिनोपक्रमैःशमं।जप्यैःसुरार्चनैर्दानैर्होमैस्तेषांशमोभवेत्।पूर्वजन्मकृतंपापंनरकस्यपरिक्षये।बाध्यतेव्याधिरूपेणतस्यजप्यादिभिःशमः।६ कुष्ठंचराजयक्ष्माचप्रमेहोग्रहणीतथा।मूत्रकृच्छ्राश्मरीकासाअतिसारभगंदरौ।७ दुष्टव्रणंगंडमालापक्षघातादिनाशनं।इत्येवमादयोरोगामहापापोद्भवाःस्मृताः।८ जलोदरंयकृत्प्लीहशूलशोकव्रणानिच।श्वासाजीर्णज्वरछर्दिभ्रममोहगलग्रहः।९ रक्तार्बुदविसर्पाद्याउपपापोद्भवागदाः।दंडपातकनाश्चित्रवपुःकंपविचर्चिकाः।१० वल्मीकपुंडरीकाद्यारोगाःपापसमुद्भवाः।शिरोरुगाद्यान्नृणांरोगाअभिशापाद्भवंतिहि।११ अन्येचबहवोरोगाजायंतेवर्णसंकरात्।उच्यंतेतानिदानानिप्रायश्चित्तानिचक्रमात्।१२ महापापेषुयत्सर्वंतदर्धमुपपातके।दद्यात्पापेषुषड्भागंदृष्ट्वाव्याधिबलाबलं।१३ अथसाधारणंतेषुगोदानादिषुकथ्यते।सर्वत्रैवयत्रदेयंस्यात्तत्रद्रव्यायदानहि।१४ गोशतंतुततोदद्यात्सगोलंकारभूषितं।वृषदानेशुभोनड्वान्शुक्लांबरसकांचनः।१५ धौरेयंहेमसंयुक्तंदद्याद्वस्त्रसमन्वितं।दशधेनुसमंपुण्यंप्रवदंतिमनीषिणः।१६ निवर्तनाभिभूदानेदशदद्याद्द्विजातये।दशहस्तेनदंडस्यात्रिंशद्दंडान्निवर्तनं।१७ दशतान्येवगोचर्मदत्वास्वर्गेमहीयते।स्कवर्णशतनिष्कंतुतदर्धार्धप्रमाणतः।अश्वदानेपुंड्रकुलमश्वंसोपस्करंदिशेत्।महिषीमहिषीदानेदद्यात्स्वर्णांबरान्वितां।१८ दद्यादजामजादानेसुवर्णपलसंयुतां।लक्षसंख्योत्तमंपुष्पंप्रदद्याद्देवतार्चने।दद्याद्द्विजसहस्रायमिष्टान्नंद्विजभोजनं।रुद्रजाप्यंलक्षपुष्पैःपूजयित्वात्रियंबकं।२१ एकादशजपंरुद्रान्दशांशंगुग्गुलेनतु।कृत्वाभिषेचनंकुर्यान्मंत्रैर्वारुणदैवतैः।२२ शांतिकेगणशांतिश्चग्रहशांतिकपूर्वकं।धान्यदानेशुभंधान्यंखारीमष्टमितंस्मृतं।२३ वस्त्रदानेपट्टकूलंकर्षकर्पूरसंयुतं।दश

शा॰स्मृ॰ पंचाथचतुरउपवेश्यद्विजोत्तमान्।२४ तेषामनुज्ञयासर्वंप्रायश्चित्तमुपक्रमेत्।विधायवैष्णवंश्राद्धंसंकल्पंनिजकाम्यया। २५ धेनुंदद्याद्द्विजाति
१ भ्योदक्षिणांचैवस्वशक्तितः।अलंकृत्ययथाशक्तिवस्त्रालंकारगोद्विजान्। २६ यान्नेदंडानुसारेणप्रायश्चित्तंयथोचितं।तेषामनुज्ञयालब्ध्वाप्रा
यश्चित्तंयथाविधिः। २७ पुनस्तान्परिपूर्णार्थमर्चयेद्विधिवद्द्विजान्।दद्याद्धु तांगदानानि तेभ्यः श्रद्धासमन्वितः। २८ संतुष्टाब्राह्मणादद्युरनुज्ञां
व्रतकारिणे।जपच्छिद्रंतपश्छिद्रंयच्छिद्रंव्रतकर्मणि।सर्वंभवतुअच्छिद्रंयस्यचेच्छंतिब्राह्मणाः।ब्राह्मणायानिभाषंतेमन्यंतेतानिदेवताः। २९ सर्वदेवम
योविप्रानतद्वचनमन्यथा।उपवासोव्रतंचैवस्नानंतीर्थफलंतपः। ३० विप्रैःसंपादितंयस्यसंपन्नंतस्यतत्फलं।संपन्नमितितद्वाक्यंवदंतिक्षितिदेवताः।
प्रणम्यशिरसाधार्यमग्निष्टोमफलंलभेत्।ब्राह्मणाज्ञांगसंतीर्थंनिर्जलंसार्वकामिकं।२२ तेषांपादोदकेनैवशुध्यंतिमलिनोजनाः।तेभ्योनुज्ञाम
नुप्राप्यप्रतिगृह्ययथाशिषः।भोजयित्वाद्विजान्पश्चात्भुंजीतसहबंधुभिः॥ ॥इतिशातातपस्मृतौकर्मविपाकेसाधारणविधिर्नामप्रथमोध्यायः॥ ॥
ब्रह्महानरकस्यांतेपांडुःकुष्ठीप्रजायते।प्रायश्चित्तानिकुर्वीतसमत्पातकशांतये।१ चत्वारःकलशाःकार्याःपंचरत्नसमन्विताः।पंचपल्लवसंयुक्ता
सितवस्त्रेणसंवृताः।२ अश्वस्थानादिमृद्युक्तास्तीर्थोदकसुपूरिताः।कषायपंचकैःपीतानानाविधिफलान्विताः।२ सर्वौषधिसमायुक्ताःस्थाप्याः
प्रतिदिशंदिशं।रौप्यमष्टदलंपद्मंमध्यकुंभोपरिन्यसेत्।तस्योपरिन्यसेद्देवंब्रह्माणंचचतुर्मुखं।पलार्धार्धप्रमाणेनसुवर्णेनविनिर्मितं।५ अर्च
येत्पुरुषसूक्तेनत्रिकालंप्रतिवासरं।यजमानःशुभैर्गंधैःपुष्पैर्धूपैर्यथाविधिः।६ ततःश्चैवीदिकुंभेषुब्राह्मणान्ब्रह्मचारिणः।पाठयेयुःस्वशाखवेदांनृग्वेदम
ष्टतीःशनैः॥दशांशेनततोहोमोग्रहशांतिपुरःसरं।मध्यकुंडेविधातव्योघृताक्तैस्तिलमाहिभिः।८ द्वादशाहमिदंकर्मसमाप्याद्द्विजपुंगवाः।
भद्रपीठेयजमानमभिषिंचेद्यथाविधिः।ततोदद्याद्यथाशक्तिगोभूहेमतिलादिकं।ब्राह्मणेभ्यस्तथादेयमाचार्याययथाविधि।१०॥
आदित्यावसवोरुद्राविश्वेदेवामरुद्गणाः।प्रीताःसर्वेव्यपोहंतुममपापस्यदारुणं।११ इत्युदीर्यमुकुंभस्थातमेवाभिषेक्षतां

पयेत्।एवंविधानेविहितेश्वेतकुष्ठिरोगिविशुध्यति।१२ कुष्ठीगोवधकारिस्यान्नरकांतेस्यनिष्कृतिः।स्थापयेत्घटमेकंतुपूर्वोक्तंद्रव्यसंयुतं।
१३ रक्तचंदनलिप्तांगंरक्तपुष्पांबरान्वितं।रक्तगर्भंतुतंकृत्वास्थापयेद्दक्षिणादिशिं।१४ ताम्रपात्रंन्यसेत्तत्रतिलपूर्णेनपूरितं।तस्योपरिन्य
सेद्देवंहेमनिष्कमयंनवं।१५ यजेत्पुरुषसूक्तेनपापंमेशाम्यतामिति।सामपारायणंकुर्यात्कलशेनत्रसामवित्।१६ दशांशसर्षपैर्होता
पायमान्याभिषेचनं।निष्कंतंधर्मराजानंआचार्यायनिवेदयेत्।१७ यमोमाहिषमारूढोदंडपाणिर्भयावहः।दक्षिणाशापतिर्देवोममपापंव्यपो
हतु।१८ इत्युदीर्यविसृज्यैनंमासंगोभक्तमाचरेत्।ब्रह्मगोवधयोरेषस्योदनभ्यासानिष्कृतिः।१९ पितृहाचेतनाहीनोमातृहांधश्चजायते।न
रकांतेप्रकुर्वीतप्रायश्चित्तंयथाविधिः।२० प्राजापत्यानिकुर्वीतत्रिंशच्छास्त्रविधानतः।व्रतांतेकारयेन्नावंसौवर्णपलसंख्यया।२१ पट्टकू
लेनसंवेष्ट्यपूजयेत्तांविधानतः।नावंद्विजायतांदद्यात्सर्वोपस्करसंयुतां।२२ वासुदेवजगन्नाथसर्वभूताशयस्थित।पातकार्णवमग्नंमांतारय
प्रणतार्तिहन्।२३ इत्युदीर्यप्रणम्याथब्राह्मणायविसर्जयेत्।अन्येभ्यश्चयथाशक्त्याविप्रेभ्योदक्षिणांददेत्।२४ हंतिवैबालकंस्कंधंस्वसा
रंतानमूलनं।तेनसंजायतेवंध्यामृतवत्साचनारिका।२५ तत्पातकविनाशायतयाकार्यंप्रयत्नतः।सौवर्णंबालकंकृत्वादद्याद्दोलासम
न्वितं।२६ अनड्वाहंततोदद्याद्वस्त्रद्वयसमन्वितं।तत्पातकविनिर्मुक्तापभ्भाङ्भवतिपुत्रिणी।२७ पिताबंदीकृतोयेननिबद्धोलोहशृंखलैः।
चिरंकष्टनरंधुस्कांतस्तत्रैवमंदिरे।तेनपापेनपापात्मापतितोरौरवार्णवे।नरकांतेभवेच्चिह्नंततःपंगुर्विचेतनः।२८ तस्यपापविनिर्मु
क्त्यैपिताकार्योहिरण्मयः।सोवर्णरथमारूढोविप्रायप्रतिपादयेत्।स्वस्टकारश्चबधिरोनरकांतेप्रजायते।मूकोभ्रातृवधेनैवत
स्येयंनिष्कृतिस्मृता।तेनकार्याविशुध्यर्थंयतिचांद्रायणंचरेत्।व्रतांतेपुस्तकंदद्यात्सुवर्णपलसंयुतं।३२ इमंमंत्रंसमुच्चार्यब्राह्मणं

शा॰ त्व तंविसृर्जयेत्। सरस्वतिजगन्मातःशब्दब्रह्माधिदेवते॥३३ अकर्मकारिणंपापंपाहिमांपरमेश्वरि। बालघातीचपुरुषोमृतवत्सः
२ प्रजायते। ३४ ब्राह्मणोद्वहनंचैवकर्तव्यंतेनशुद्धये। श्रवणंहरिवंशस्यकर्तव्यंचयथाविधिः। ३५ महारुद्रजपाद्यंचकारयेच्चयथावि
धिः। षडंगैकादशैरुद्रैरुद्रीसमभिधीयते। ३६ एकादशभिरेताभीरुद्रैःसमभिधीयते। रुद्रैस्थैकादशभिर्महारुद्रःप्रकीर्तितः। ३७
एकादशभिरेतैस्तुअतिरुद्रश्चकथ्यते। गुडूच्याश्चदशांशेनदूर्वाधाद्याहुतीस्तथा। एकादशस्वर्णनिष्काःप्रदातव्याश्चदक्षिणा। पद्मान्ये
कादशतथाद्योदोद्दिष्टानुसारतः। अन्येभ्योपियथाशक्त्याद्विजेभ्योदक्षिणांददेत्। स्नापयेद्दंपतीपश्चान्मंत्रैर्वारुणदैवतैः। ४० आचार्याय
प्रदेयानिवस्त्रालंकारणानिच। गोत्रहासूतकीचैवप्राजापत्यशतंचरेत्। भर्तानेमेदिनींदद्याच्छृणुयाद्वाथभारतं। स्त्रीहंताचाभिसारी
स्याद्दश्वत्थस्थापयेद्दश। ४२ विप्रस्यबालकंहत्वासंहृतंरत्नकांचने। तत्तेनजायतेमृत्युपुत्राणांचपुनःपुनः। ४३ तेनकर्मविनाशायकार्यं
तेनैवयत्नतः। गोदृषोहेमसंयुक्तोदातव्योवस्त्रसंयुतः। ४४ दद्याच्चशर्कराधेनुंभोजयेच्चशतंद्विजान्। राजहाक्षयरोगीस्याद्देयातस्यतु
निष्कृतिः। ४५ गोभूहिरण्यमिष्टान्नंजलवस्त्रप्रदानतः। रक्तार्बुदीवैश्यहंताजायतेससमाचरेत्। ४६ प्राजापत्यानिचत्वारिसप्तधान्यानि
चोत्सृजेत्। दंडपातानकश्चुनशूद्रहंताभवेन्नरः। ४७ प्राजापत्यंचकृत्वैवदद्याद्धेनुंसदक्षिणां। कारुणंचवृथेलछरुक्षतारश्चजायते
तेनतत्पापशुध्यर्थंदातव्योवृषभःसितः। सर्वकार्येष्वसिद्धार्थोगजघातीभवेन्नरः। ४९ प्रासादंकारयित्वातुगणेशप्रतिमान्यसेत्। अथवा
गणनाथस्यमंत्रंलक्षमितंजपेत्। ५० दशांशहोमश्चाद्यद्रव्यैर्गणशांतिपुरःसरं। उष्ट्रेविनिहतेचैवजायतेविकृतिःस्वरः। ५१ सततापविधु २

अर्थंदद्यात्कर्पूरजंफलं। अश्वेविनिहतेचैववक्रकंठःप्रजायते। शतंपलानिदद्याच्चचंदनस्यद्विजातये। महिषीघातनेचैववक्रकंठःप्रजायते। ५३
स्वशक्त्यामहिषींदद्याद्रक्तवस्त्रद्वयंतथा। खरेपिनिहतेचैवनरःखररोमोप्रजायते। ५४ निष्कमात्रांखरींकृत्वाप्रदद्यात्साहिरण्मयीं। तिरभेनि
हतेचैवजायतेकावरेक्षणः। दद्याद्रत्नमयींधेनुंसतत्पातकशांतये। सूकरेनिहतेचैवदंतुरोजायतेनरः। सदद्यात्तद्विशुध्यर्थंघृतकुंभं
सदक्षिणं। हरिणेनिहतेखंजःश्रृगालेश्वस्तपादकः। ५७ अश्वस्तेनप्रदातव्यासौवर्णनिष्कसंमितं। अजाभिघातनेचैवअधिकांगःप्रजा
यते। ५८ कस्तूरिकांसदद्याद्धिब्राह्मणायविशुद्धये। मार्जारेनिहतेचैवजायतेपिंगलोचनः। तेनवैदूर्यरत्नानिदातव्यानिस्वशक्तितः। जाय
तेवक्रपादस्तुनिहतेशुनिमानवः। ५९ निष्कत्रयमितंदद्यात्स्वर्णंतुविशुद्धये। नकुलस्याभिहननेजायतेवक्रमंडनं। ६१ निष्कद्वयमि
तंदद्यात्नकुलंसविशुद्धये। शशकेनिहतेचैवकुंठकर्णस्तुजायते। ६२ शय्यांदद्यात्सविप्रायसोपधानांसतूलिकां। शयालुःसर्पहाद
द्यात्लोहदंडंसदक्षिणं। ६३ कुक्कोमूषकहादद्यात्कामधान्यंसकांचनं। मयूरघातनेचैवजायतेकृष्णमंडलं। ६४ निष्कत्रयमितोदेयस्तेनस्व
र्णमयःशिखी। हंसघातीभवेद्यस्तुतस्यस्याच्छ्वेतमंडनं। ६५ रूप्यंपलत्रयंयुतंहंसंदद्याद्विशुद्धये। कुक्कुटेनिहतेचैववक्रनासःप्रजायते। ६६
तेननिष्कप्रदातव्योब्राह्मणायहिरण्मयः। पारावतेवानिहितेपीतपाणिःप्रजायते। ६७ पारावतंचसौवर्णंसदद्यान्निष्कमात्रकं। शुक
सारसयोर्घातेनरस्सुबालितवान्भवेत्। ६८ तत्रश्वपुस्तकंदत्वासविप्रायसदक्षिणां। बकघातीदीर्घगलोदद्यात्क्रौंचबकप्रभां। ६९
काकघातीकूर्चहीनोदद्याद्गामसितप्रभां। हिंसायांनिष्कृतिरियंब्राह्मणेयमुदाहृता। ७० तदर्धार्धप्रमाणेनक्षत्रियाणामनुक्रमात्। क्ष
त्रियोमृगयांचक्रेमृगान्निघ्ननदुष्यति। ७१ नेस्यचुद्धांगणगतोयुध्यमानांस्तांप्रमापयेत्। गजादिकान्सप्तदशसप्तसप्तोत्तरान्क्रमात्। य

निघ्नंनचाप्नोतिनरश्चिन्हानिकथितानिच।मयूराद्यास्तथासप्तचतुर्दशोत्तरान्क्रमात्।७३ गर्भपातकरीनारीस्वदेहेभोगलब्धया।सप्त
जन्मावधिंयायानरकांतेहसंतिका।७४ तत्पातकविनाशायबालंकुर्याद्धिरण्मयं।निधायपालकंदद्यात्सवस्त्रहेमसंमितां ७५ इतिशाता
तपस्मृतौकर्मविपाकेवधप्रायश्चित्तविधिर्नामद्वितीयोध्यायः॥ ॥सुरापःश्यावदंतःस्यात्प्राजापत्याष्टकंचरेत्।शर्करायाःपलंसप्तदद्यात्
पापविशुद्धये।१ जपित्वातुमहारुद्रंदशांशंजुहुयात्तिलैः।ततोभिषेकंकर्तव्यंमंत्रैर्वारुणदैवतैः।२ मद्यपोरक्तपित्तिस्यात्सदद्यात्सर्पिषो
घटं।मधुनोर्धघटंचैवसहिरण्यंविशुद्धये।३ अभक्ष्यभक्षणाच्चैवजायतेकृमिकोदरः।यथाविधितेनशुध्यर्थमुपोष्यंभीष्मपंचकं।उदक्यावी
क्षितंभुक्त्वाजायतेकृमिकोदरः।गोमूत्रयावकाहारात्रिरात्रेणैवशुध्यति।५ भुक्त्वाचास्पृश्यसंस्पृष्टंजायतेक्लिष्टोदरः।त्रिरात्रंवैलंघनंकुर्या
त्सतत्पातकशांतये।श्वमार्जारादिभिर्दष्टंभुक्त्वादुर्गंधवान्भवेत्।पीत्वात्रिरात्रंगोमूत्रंभोजयेद्ब्राह्मणत्रयं।७ अनिवेद्यसुरादिभ्योभुंजते
जायतेनरः।भोजयेत्त्रिंशतंविप्रान्सहस्रंवाप्रमाणतः।८ परान्नविघ्नकरणादजीर्णमभिजायते।लक्षहोमंसकुर्वीतप्रायश्चित्तंयथाविधिः।९
मंदोदराग्निर्भवतिसतिद्रव्येकदन्नदः।प्राजापत्यद्वयंकुर्यात्भोजयेच्चशतंद्विजान्।विषप्रदश्छर्दिरोगीदद्याद्दशपयस्विनीं।मार्गहापादरोगी
स्यात्सोश्वदानंसमाचरेत्॥११ पिशुनोनरकस्यांतेजायतेश्वासकासवान्।घृतंतेनप्रदातव्यंसहस्रपलसंमितं।१२ धूर्तोपस्माररोगीस्यात्स
तत्पापविशुद्धये।ब्रह्मकूर्चत्रयंकुर्याद्धेनुंदद्यात्सदक्षिणां।शूलीपरोपतापेनजायतेतत्प्रमार्जने।सोन्नदानंप्रकुर्वीततथारुद्रंजपेन्नरः।१४ दावा
ग्निदायकश्चैवरक्तातीसारवान्भवेत्।तेनोदपानंकर्तव्यंरोपणीयस्तथावटः।१५ सुरालयेजलेवापिसकृद्विष्ठांकरोतियः।गुदरोगोभवेत्तस्य
पापरूपःसुदारुणः।१६ मासंसुरार्चनेनैवगोदानद्वितयेनतु।प्राजापत्येनचैकेनशाम्यंतिगुदजारुजः।१७ गर्भस्तंभकरानारीकाकवंध्याप्रजा

यते।तयाकार्यंप्रयत्नेनगोदानंविधिपूर्वकं।१८ गर्भपातनजारोगायकृत्प्लीहजलोदराः।तेषांप्रशमनार्थायप्रायश्चित्तमिदंस्मृतं।१९ एतेषुदद्याद्विप्राय
जलधेनुंविधानतः।सुवर्णरूप्यताम्राणांपलत्रयसमन्वितां।२० प्रतिमाभंगकारीचप्रतिष्ठाप्यप्रजापतिं।संवत्सरत्रयंसिंचेदश्वत्थंसोमवा
सरं।उद्वाहयेत्तमश्वत्थंस्वगृह्योक्तविधानतः।ततःसंस्थापयेद्देवंविप्रराजंसुपूजितं।२२ दुष्टवादीखंडितस्यात्सवैदद्याद्द्विजातये।रूपत्रयपत्र
पंदुग्धघटत्रयसमन्वितं।खल्वाटःपरनिंदास्याद्धेनुंदद्यात्सकंबलां।परोपहासकृत्काणःसगांदद्यात्समौक्तिकां।२४ सभायांपक्षपातीचजा
यतेपक्षघातवान्।निष्कत्रयमितंहेमसदद्यात्सत्यवर्तिनां।२५॥ ॥इतिश्रीशातातपेकर्मविपाकेअपेयप्रायश्चित्तंनामतृतीयोध्यायः॥ ॥कु
नखीनरकस्यांतेजायतेविप्रहेमहृत्।सतुस्वर्णशतंदद्यात्कृत्वाचांद्रायणत्रयं।१ आदावटीताम्रचोरोनरकांतेभजायते।प्राजापत्यंसकृच्चैकंता
म्रंपलशतंदिशेत्।२ रौप्यहृन्नरकस्यांतेजायतेचित्रकुष्ठवान्।प्राजापत्यत्रयंकृत्वादेयंरूप्यपलत्रयं॥३ कांस्यहारीचभवतिपुंडरीकसमन्वितः।
कांस्यंशतंपलंदद्यादुपोष्यदिवसंनरः।४ रीतिहृत्पिंगलाक्षःस्यादुपोष्यहरिवासरं।रीतिःपलशतंदद्यादुपोष्यसविधानतः।त्रपुहारीचपुरु
षोजायतेश्लेष्मतुःसदा।उपोष्यदिवसंसोपिदद्यात्पलशतंत्रपु।६ सीसहारीचपुरुषोजायतेशीर्षरोगवान्।सीसंपलशतंदद्यादुपोष्यसतुवास
रं।७ घृतचोरस्तुपुरुषोजायतेनेत्ररोगवान्।उपोष्यदिवसंदद्याद्घृतधेनुंविधानतः।८ दुग्धहारीचपुरुषोजायतेबहुमूत्रकृत्।सदद्याद्दधिधेनुं
चब्राह्मणाययथाविधि।९ दधिचौर्येणपुरुषोजायतेमेदसावृतः।दधिधेनुःप्रदातव्यातेनविप्रायशुद्धये।१० मधुचोरस्तुपुरुषोजायतेवस्तिरोगवा
न्।सदद्यान्मधुधेनुंचसमुपोष्यद्विजातये।११ इक्षुविकारहारीचभवेदुदरगुल्मवान्।गुडधेनुःप्रदातव्यातेनतद्दोषशांतये।१२ लोहहारीच
रुषोबर्बरांगश्चजायते।लोहंपलशतंदद्यादुपोष्यसतुवासरं।१३ तैलचोरस्तुपुरुषोभवेत्कंडूनिपीडितः।उपोष्यसतुविप्रायदद्यात्तैलघटद्वयं

शा०स्मृ० आमान्नहरणाच्चैव दंतहीनः प्रजायते। सदद्याद्दश्वेतं हेमनिष्कद्वयसमन्वितं १५ पक्वान्नहरणाच्चैव जिह्वारोगः प्रजायते। गायत्र्यास जपेल्लक्षं दशांशं
४ शजुहुयाच्चवैः। १६ फलहारी च पुरुषो जायते व्रणतांगुलः। नानाफलानामयुतं सदद्यात्तु द्विजातये। १७ तांबूलहरणाच्चैव श्वेतोष्ठः सप्रजायते। दक्षिणा
संप्रदद्याच्च सविद्रुमद्वयं चरेत्। १८ शाकहारी च पुरुषो जायते नीललोचनः। ब्राह्मणाय प्रदद्याद्वै महानीलमणिद्वयं। १९ कंदमूलापहरणाद्ध्रस्वपाणिः
प्रजायते। देवतायतने कार्यमुद्यानं तेन शक्तितः। २० सौगंधिकस्य हरणाद्दुर्गंधांगः प्रजायते। सल्लक्षमेकं पमानां जुहुयाज्जातवेदसि। २१ भारहारी च पु
रुषो भग्नपाणिः प्रजायते। सदद्याद्ब्राह्मणायाथ। काश्मीरजपलत्रयं। २२ विद्यापुस्तकहारी च किलमूकः प्रजायते। न्यायेतिहासं दद्याच्च ब्राह्मणाय सदक्षि
णां। २३ वस्त्रहारी च शीताङ्गः प्रसदद्यात्प्रजापतिं। हेमनिष्कमयं चैव वस्त्रयुग्मं च स्वं द्विजातये। २४ ऊर्णाहारी लोमशः स्यात्सदद्यात्कंबलान्वितं। स्वर्णनिष्क
मितं हेमं बह्निं दद्याद्द्विजातये। २५ पट्टसूत्रस्य हरणान्निर्लोमो जायते नरः। तेन धेनुः प्रदातव्या तद्वर्णा च द्विजातये। २६ औषधीहरणे चैव सूर्यावर्त
श्च जायते। सूर्यायार्घ्यः प्रदातव्यो मासं देवं च कांचनं। २७ रक्तवस्त्रप्रवालादिहारी स्याद्रक्तवातवान्। सवत्सां महिषीं दद्यात्पद्मरागसमन्वितां।
२८ विप्ररत्नापहारी च अनपत्यः प्रजायते। तेन कार्यं विशुध्यर्थं महारुद्रजपादिकं। २९ मृतवत्सोदितः सर्वो विधिरत्र विधीयते। दशांशहोमः कर्त
व्यो पालाशेन यथाविधि। ३० अनड्वान्वस्त्रसंयुक्तः पलार्धार्थं च कांचनं। निर्धनेन प्रकर्तव्यं द्विजस्य मुच्यते क्षणात्। ३१ ब्राह्मणस्वधनी लोभाद्योना
र्पयन्ति मूढधीः। निर्वंशो जायते तस्य दद्याद्दश पयस्विनीः। ३२ देवस्वहरणाच्चैव जायते विविधो ज्वरः। ज्वरो महाज्वरश्चैव रौद्रो वैष्णव एव च। ३३
ज्वरे रुद्रं जपेत्काम्यं महारुद्रं महाज्वरे। महारौद्रीं जपेद्रौद्रे वैष्णवे तद्द्वयं जपेत्। ३४ नानाविधद्रव्यचोरो जायते ग्रहणीयुतः। तेनान्नोदकवस्त्राणि ४
हेम देयं च शक्तितः। ३५ तिलमाषकुलोहहारी गलचर्मी प्रजायते। माषद्वियमितं दद्याद्द्विपंचाशत्तिलान्वितं। ३६ इतिश्री शाततपे कर्मविपा

केस्तेयप्रायश्चित्तं नाम चतुर्थोध्यायः॥ ॥ मातृगामी भवेद्यस्तु लिंगं तस्य विनश्यति। चांडालीगमने चैव हीनकुष्ठं प्रजायते। १ तस्य प्रतिक्रि
यां कुर्यात्कुंभमुत्तरतो न्यसेत्। कृष्णवस्त्रसमाछन्नं कृष्णमाल्यविभूषितं। २ तस्योपरिन्यसेद्देवं कांस्यपात्रे धनेश्वरं। सुवर्णषष्ठनिष्केण नि
र्मितं नरवाहनं। ३ यजेत्पुरुषसूक्तेन धनदं विश्वरूपिणं। अथर्ववेदविद्विप्र अथर्वाणं समापयेत्। ४ सुवर्णपुत्रिकां कृत्वा निष्कविंशतिसं
ख्यया। दद्याद्विप्राय संपूज्य निष्पापस्यामिति ब्रुवन्। ५ निधीनामधिपो देवः शंकरस्य प्रियः सखा। सौम्याशाधिपतिः श्रीमान्मम पापं व्यपो
हतु। ६ इत्थं मंत्रं समुच्चार्य आचार्याय यथाविधि। दद्याद्देवं हीनकुष्ठोलिंगनाशविशुद्धये। ७ गुरुभार्याभिगमनान्मूत्रकृच्छ्रं प्रजायते। तेना
पि निष्कृतिः कार्या शास्त्रदृष्टेन कर्मणा। ८ स्थापयेत्कुंभमेकं तु पश्चिमायां शुभे निशि। नीलवस्त्रसमाछन्नं नीलमाल्यादिभूषितं। ९ तस्योपरि
न्यसेल्लोहपात्रे देवं प्रचेतसं। सुवर्णनिष्कषट्केन निर्मितं यादसांपतिं। १० यजेत्पुरुषसूक्तेन वरुणं विश्वरूपिणं। सामविद्ब्राह्मण
स्तत्र सामवेदं समापयेत्। ११ सुवर्णपुत्रिकां कृत्वा निष्कविंशतिसंख्यया। दद्याद्विप्राय संपूज्य निःपापस्यामिति ब्रुवन्। १२ यादसामधिपो
देव विश्वेषामपि पावनः। संसाराब्धिः कर्णधारो वरुणः पावनोस्तु मे। १३ इमं मंत्रं समुच्चार्य आचार्याय यथाविधि। दद्याद्देवमलंकृत्य मू
त्रकृच्छ्रप्रशांतये। १४ स्वसुतागमने चैव रक्तकुष्ठं प्रजायते। भगिनीगमने चैव पीतकुष्ठं प्रजायते। १५ तस्य प्रतिक्रियां कुर्यात्पूर्वतः कलशं न्य
सेत्। पीतवस्त्रसमाछन्नं पीतमाल्याभिभूषितं। १६ तस्योपरिन्यसेत्स्वर्णपात्रे देवं सुरेश्वरं। सुवर्णनिष्कषट्केन निर्मितं वज्रधारिणं। १७
यजेत्पुरुषसूक्तेन वासवं विश्वरूपिणं। बह्वृचस्तत्र कलशे ऋग्वेदं तु समापयेत्। १८ सुवर्णपुत्रिकां कृत्वा सुवर्णदशकेन तु। दद्याद्विप्राय सं
पूज्य निःपापस्यामिति ब्रुवन्। १९ देवानामधिपो देवो जिष्णुः कुलिशकेतनः। शतयज्ञः सहस्राक्षः पापं मम निकृंततु। २० इमं मंत्रं समुच्चार्य

शा.स्मृ. आचार्याययथाविधि।दद्याद्देवंसहस्त्रासंस्यपापस्यापनुत्तये।२१ भ्रात्टभार्याभिगमनात्गुल्मकुष्टंप्रजायते।स्वबंधूगमनेचैवकुष्ठ
५ कुष्टप्रजायते।तेनकार्यंविशुध्यर्थंप्रागुक्तस्यार्थमेवहि।दशांशहोम।कर्तव्योघृताक्तैःक्रियतेतिलैः।२२ स्याम्यंगनाभिगमनाज्जायतेद
दुमंडलं।कृत्वालोहमयींधेनुंपलषष्टिप्रमाणतः।२४ कार्पासभारसंयुक्तांसप्तधान्येनसंयुतां।दद्याद्विप्रायसत्कल्पपापंमेक्षीयतामि
ति।२५ विश्वस्तभार्यागमनाद्गजचर्मप्रजायते।तस्यपापविनाशायप्रायश्चित्तंविधीयते।२६ कृत्वारौप्यमयींधेनुंनिष्कविंशतिसंख्यया॥
तस्यपापस्यनाशायवस्त्रोपानहसंयुता।२७ दद्याद्विप्रायविधिवदिमंमंत्रमुदीरयेत्।सुरभिर्वैष्णवीमाताममपापंव्यपोहतु।२८ मातुःसप
त्नीगमनेजायतेचाश्मरीगदः।सतुपापविशुध्यर्थंप्रायश्चित्तंसमाचरेत्।२९ दद्याद्विप्रायविदुषेमधुधेनुंयथोदितां।तिलद्रोणशतंचैवाहि
रण्येनसमन्वितां।३० पितृस्वसाभिगमनेदक्षिणांगेव्रणीभवेत्।ततोपिनिष्कृतिःकार्याअजादानेनयत्नतः।३१ मातुलान्यास्तुगमनेदृष्टि
कुष्टंप्रजायते।कृष्णाजिनप्रदानेनप्रायश्चित्तंसमाचरेत्।३२ मातृस्वसाभिगमनेवामांगेव्रणवान्भवेत्।तेनापिनिष्कृतिःकार्यासम्यक्दा
सीप्रदानतः।३३ पितृव्यपत्नीगमनात्कटिकुष्ठंप्रजायते।निष्कृतिस्तेनकर्तव्याकन्यादानेनयत्नतः।३४ यदगम्यास्तुसंयोगात्प्रायश्चित्तमुदीर
येत्।तदेवमुनिभिःप्रोक्तंनियतंतुसुतास्वपि।३५ पितृभार्याभिगामीचमृतभार्यःप्रजायते।सतुपापविशुध्यर्थंद्विजमेकंविवाहयेत्।३६ स्वगो
त्रस्त्रीप्रसंगेनजायतेचभगंदरः।तेनापिनिष्कृतिःकार्यामेषीदानेनयत्नतः।३७ तपस्विन्याश्चगमनेप्रमेहीजायतेनरः।मासंरुद्रजपः
कार्योदद्याद्वत्सपात्रकंक्षिप्तां।दीक्षितस्त्रीप्रसंगेनजायतेदुष्टरक्तदृक्।सपातकविशुध्यर्थंप्राजापत्यानिषट्चरेत्।३९ प्राणनाथपरि ५
त्यज्यदेवरंसेवतेध्रुवं।गुदमध्येभवेद्व्याधिरर्शनानामदुःसहं।४० तयाकार्यंप्रयत्नेनगोदानंहेमसंयुतं।गोविंदगोपीजनवल्लभोस्याःकंसासुर

घ्नःस्त्रिदशेशवंद्यः।गोदानतत्तेसुमतेदयालुराशामनार्थंक्षपितारिवर्गः।४१ ॥श्रोत्रियस्त्रीप्रसंगेनजायतेनासिकाव्रणी।आचरेत्सवि
शुध्यर्थंप्राजापत्यचतुष्टयं।४२ स्वजातिजायागमनेजायतेहृदयव्रणः।सपातकविशुध्यर्थंप्राजापत्यद्वयंचरेत्।४३ जात्युत्तमस्त्रीगमना
ज्जायतेमस्तकव्रणः।सपातकविशुध्यर्थंप्राजापत्यंसमाचरेत्।४४ पशुयोनौचगमनान्मूत्रस्तंभःप्रजायते।सहस्रकलशैःस्नानंमासंकुर्यात्
शिवस्यच।४५ एतेदोषानराणांस्युर्नरकांतेनसंशयः।स्त्रीणामपिभवंत्येतेतत्तत्पुरुषसंगमात्।४६ आसुरीअसतीदासीचर्मकारीचनर्त
की।रजकीभिःसमंभोगात्पतंतिपितृभिःसह।४७ उपोष्यैकादशींशुद्धांजागरंकारयेन्निशि।तस्यपापविशुध्यर्थंदद्यादेकांपयस्विनीं॥ ॥
इतिश्रीशातातपेकर्मविपाकेअगम्यागमनंनामपंचमोध्यायः॥ ॥उनश्वसूकरक्रमिदुमश्रृंगिशकटाहताः।भृग्वग्निदारुशस्त्राश्मविषोद्बं
धनक्लेशैर्मृताः।१ व्याघ्रादिगजभूपालचौरवैरीवृकाहताः।अष्टशल्यामृताश्चैवशौचसंस्कारवर्जिताः।२ विषूचिकान्यकवलभ्रमातिसारतोमृ
ताःशाकिन्यादिग्रहैर्ग्रस्ताविद्युत्पातहताश्चये।३ अस्पृश्यस्पर्शनिंद्याश्चपतितापत्यवर्जिताः।पंचत्रिंशत्प्रकारैश्चनाप्नुवंतिगतिंमृताः।४
पित्राद्याःपिंडभाजस्तुस्त्रयोलेपभुजस्तथा।ततोनांदीमुखाःप्रोक्ताःसौम्याप्यश्रुमुखास्त्रयः।५ द्वादशैवंपितृगणास्तर्पिताःसंततिप्रदाः।
गानिहीनाःसुतादीनांसंततिंनाशयंतिहि।६ दशम्याद्यादिनिहतागर्भनिर्भर्त्स्यमीकमात्।द्वादशाद्यादितिहताःआकर्षंतिचबालकं।७ उपा
दिनिहताश्चत्रिदशाद्वादशास्वपि।वैषैकिंबालकंकुर्यादनपत्योनपत्यता।८ व्याघ्रेणाहन्यतेजंतुःकुमारीगमनेनच।विषादाश्चैवसर्पेण
गजेनन्टपदुष्टकैः।राजाराजकुमारश्चचौरेणपशुहिंसकः।वैरेणमित्रभेदीचहृत्कर्त्तितृकेनतु।१० गुरुघातीनिशाम्याणांमत्सरी
चोच्चवर्जितः।द्रोहीसंस्कारराहितःशुनानिक्षेपहारकः।११ शुनानिक्षेपहारीचसूकरेणाचपाशकः।१२ क्रमिभिःकृतनाशश्चद्रुमेणवि

शाता·
६

निष्फलनरः।१२ शृंगिणा शंकरद्रोही शकटेन तु घातकः। कूपाहा मेदिनीचोरो रोगक्लिन्नाय यद्धांनिकृत्। १३ दारुणा दक्षिणा — अस्त्रेणश्रुति
निंदकः। अश्मना द्विजनिंदाल्लद्विषेण कुमतिप्रादः। १४ उद्बंधनेन हिंस्रस्कंसे तु भेदी जले न तु। गोग्रासहृद्विशुचिकया केवलेन द्विजान्नहृत्। १५
स्मेयाराजपत्नीहृदतिसारेणानिःक्रियः। शाकिन्याद्यैश्च म्रियते स्वदर्पाकार्यकारकाः। १६ अनाध्याये ध्यधीयानां म्रियंते विप्रकृतानराः। अ
स्पृश्यास्पृश्यसंगेत्विभ्रांति हृत्कुदुष्टशास्त्रकृत्। १७ पतितो सत्यविक्रेण अनपत्यो द्विजान्नहृत्। अथ तेषां क्रमेणैव प्रायश्चित्तं विधीयते।
१८ विक्रेताघातकश्चैव ब्रह्मावेनो तुल्या हतो। घातकश्चैव हत्यामांसो मिगारो मिग्नाच विक्रयी। १९ कारयेन्निष्कमात्रं तु लतां तं प्रेतरूपिणं। चतु
र्भुजं दंडहस्तं महिषासनसंस्थितं। २० पिष्टैः कृष्णतिलैः कुर्यात्पिंडं प्रस्थप्रमाणतः। मध्वाज्यशर्करायुक्तं स्वर्णदंडेन संयुतं। २१ अकालमू
लकलशं पंचपल्लवसंयुतं। कृत्वा वस्त्रसमाछिन्नं सर्वौषधिसमन्वितं। २२ तस्योपरिन्यसेद्वंशपात्रं धान्यफलैर्युतं। सप्तधारं च कलशं
तत्र तत्संमुखं न्यसेत्। २३ कुंभोपरि च विन्यस्य पूजयेत्प्रेतरूपिणं। कुर्यात्पुरुषसूक्तेन अमृत चंदुग्धतर्पणं। २४ षडंगाश्च जपेद्रुद्रान् कलशेत
त्र वेदवित्। यमसूक्तेन कूष्मांडजपपूजारिकं तथा। २५ गायत्र्या चैव कर्तव्यो जपस्यात्मविशुद्धये। ग्रहशांतिकपूर्वं तु दशांशं जुहुयात्तिलैः।
२६ अज्ञातनामगोत्राय प्रेताय सतिलोदकं। प्रदद्यात्पितृतीर्थेन पिंडं मंत्रमुदीरयेत्। २७ इमं तिलमयं पिंडं मधुसर्पिःसमन्वितं। ददामि
तस्मै प्रेताय यः पीडां कुरुते मयि। २८ सजलान्नलघुकलशान् तिलपात्रसमन्वितान्। द्वादशप्रेतनिर्देशं दद्यादेकं च विप्लवे। २९ ततोऽभि
षिंचेदाचार्यो दंपती कलशोदके। शुचिरत्नांबरधरो मंत्रैर्वारुणदैवतैः। ३० यजमानः ततो दद्यादाचार्याय सदक्षिणां। ततो नारायण
बलिः कर्तव्यः शास्त्रनिश्चये। ३१ एषनिःसारणविधिरगतीनां समुदाहृतः। विशेषस्तु पुनर्ज्ञेयो व्याघ्रादिनिहतेष्वपि। ३२ व्याघ्रेणान ६

शा·स्मृ·
७

हते प्रेते परकन्यां विवाहयेत्। सर्पदष्टे नागबलिर्देयः सर्पश्च कांचनः। चतुर्निष्कमितं हेमं गजं दद्याद्गजाहते। राज्ञा विनिहते दद्यात्पुरुषं तु
हिरण्मयं। ३२ चौरेणानिहते धेनुर्वैरिणा निहते वृषं। वृषेणानिहते दद्याद्यथाशक्त्यान्नकांचनं। ३४ शय्यामृते प्रदातव्या शय्या तूलिसमान्
तौ। निष्कमात्रसुवर्णस्य विष्णुना सहधिष्ठिता। ३५ शौचहीने मृते चैव द्विनिष्कस्वर्णजं हरिं। संस्कारहीने च मृते कुमारमुपनीतयेत्। ३६
निष्कत्रयस्वर्णमितं दद्यादश्वहयाहते। शुनाहते क्षेत्रपालं स्थापयेन्निजशक्तितः। ३७ सूकरेण हते दद्यान्महिषं दक्षिणान्वितं। शाकटेने
हते दद्याद्दरंसोपस्करान्वितं। कृमिभिश्च हते दद्याद्वृषभं वस्त्रसंयुतं। भृगूपाते मृते चैव प्रदद्याद्धान्यपर्वतं। २८ अग्निना निहते कार्यम
ग्निम्मम्मत्तिपूजां स्वशक्तितः। दारुणा निहते चैव कर्तव्या सदने सभा। ४० शस्त्रेणानिहते दद्यात् महिषीं दक्षिणान्वितां। अश्मना निहते द
द्यात्सवत्सां गां पयस्विनीं। ४१ विषेण च मृते दद्यान्मेदिनीं हेमनिर्मितां। ऊर्ध्वंधिने मृते दद्यात्कपिं कनकनिर्मितां। ४२ मृते जलेन वरुणं
हेमं दद्याद्द्विनिष्ककं। विषूचिकामृते दद्यात्स्वादन्नं भोजयेद्द्विजान्। ४३ तिलधेनुः प्रदातव्या कषायान्नकुवलेन तु। कासासे मृते चापि
कृछ्रादिकं व्रतं चरेत्। ४४ निष्फलातेन निहते विद्यादानं समाचरेत्। अस्पर्शे च मृते कार्यं वेदपारायणं तथा। ४५ सशास्त्रं पुस्तकं दद्या
त् अस्पृश्यस्पर्शतो मृते। पतिते न मृते कुर्यात्त्रिनापत्याश्च षोडश। ४६ मृते चापत्यरहिते कृच्छ्राणां नवतीं चरेत्। एवं कृते विधाने तु वि
दध्याद्दौर्ध्वदेहिकं। ४७ ततः प्रेतत्वनिर्मुक्ताः पितरस्तर्पितास्तथा। ददुः पुत्रांश्च पौत्रांश्च आयुरारोग्यसंपदः। ४८ इति शाता
तपेनोक्तो विपाकः कर्मणामयं। शिष्याय शरभंगाय विनयात्परिपृच्छते। ४९ इति श्रीशातातपस्मृतौ कर्मविपाके अगतिप्राय
श्चित्तं नाम षष्ठोऽध्यायः॥ ॥ शके ७२५ रुधिरोद्गारीसंवत् वैशाख व ११ एकादश्यां शातातपस्मृतिर्लिखितं केशवफडकेण· ७

गोधूमाश्चणकायवामसुरिकानिष्पावरवल्वास्तिलामुद्गाः सर्षपशालिकंगुतवरीमाषाकुलित्थास्तथा। श्यामाकाश्च
गवेधुकाश्चनृपमाषायावनाळाः क्रमादित्यष्टादशधान्यकानिमुनिभिः प्रोक्तानिमन्वादिभिः॥ १
गोदावर्युत्तरेभागेभागीरथ्याश्चपश्चिमे। विवाहादिनकर्तव्यंसिंहस्थेचबृहस्पतौ।१ वरकन्यातिकालाभ्यांदुर्भिक्षाद्देशविप्लवात्। गोतम्यादक्षिणेतीरेसिंह
स्थेप्युद्वहःशुभः। सिंहस्थेपिमघासंस्थंगुरुंयत्नेनवर्जयेत्। अन्यत्रसिंहभागेषुविवाहादिविधीयते॥ इतिकालनिर्णयसिद्धांते॥